# ॥ शुक्राष्टोत्तरशतनामावली ॥

शुक्र बीज मन्त्र -
ॐ द्राँ द्रीं द्रौं सः शुक्राय नमः ॥

ॐ शुक्राय नमः ॥

ॐ शुचये नमः ॥

ॐ शुभगुणाय नमः ॥

ॐ शुभदाय नमः ॥

ॐ शुभलक्षणाय नमः ॥

ॐ शोभनाक्षाय नमः ॥

ॐ शुभ्रवाहाय नमः ॥

ॐ शुद्धस्फटिकभास्वराय नमः ॥

ॐ दीनार्तिहरकाय नमः ॥

ॐ दैत्यगुरवे नमः ॥ १०
ॐ देवाभिवन्दिताय नमः ॥

ॐ काव्यासक्ताय नमः ॥

ॐ कामपालाय नमः ॥

ॐ कवये नमः ॥

ॐ कल्याणदायकाय नमः ॥

ॐ भद्रमूर्तये नमः ॥

ॐ भद्रगुणाय नमः ॥

ॐ भार्गवाय नमः ॥

ॐ भक्तपालनाय नमः ॥

ॐ भोगदाय नमः ॥ २०
ॐ भुवनाध्यक्षाय नमः ॥

ॐ भुक्तिमुक्तिफलप्रदाय नमः ॥

ॐ चारुशीलाय नमः ॥

ॐ चारुरूपाय नमः ॥

ॐ चारुचन्द्रनिभाननाय नमः ॥

ॐ निधये नमः ॥

ॐ निखिलशास्त्रज्ञाय नमः ॥

ॐ नीतिविद्याधुरंधराय नमः ॥

ॐ सर्वलक्षणसम्पन्नाय नमः ॥

ॐ सर्वापद्गुणवर्जिताय नमः ॥ ३०
ॐ समानाधिकनिर्मुक्ताय नमः ॥

ॐ सकलागमपारगाय नमः ॥

ॐ भृगवे नमः ॥

ॐ भोगकराय नमः ॥

ॐ भूमिसुरपालनतत्पराय नमः ॥

ॐ मनस्विने नमः ॥

ॐ मानदाय नमः ॥

ॐ मान्याय नमः ॥

ॐ मायातीताय नमः ॥

ॐ महायशसे नमः ॥ ४०
ॐ बलिप्रसन्नाय नमः ॥

ॐ अभयदाय नमः ॥

ॐ बलिने नमः ॥

ॐ सत्यपराक्रमाय नमः ॥

ॐ भवपाशपरित्यागाय नमः ॥

ॐ बलिबन्धविमोचकाय नमः ॥

ॐ घनाशयाय नमः ॥

ॐ घनाध्यक्षाय नमः ॥

ॐ कम्बुग्रीवाय नमः ॥

ॐ कलाधराय नमः ॥ ५०
ॐ कारुण्यरससम्पूर्णाय नमः ॥

ॐ कल्याणगुणवर्धनाय नमः ॥

ॐ श्वेताम्बराय नमः ॥

ॐ श्वेतवपुषे नमः ॥

ॐ चतुर्भुजसमन्विताय नमः ॥

ॐ अक्षमालाधराय नमः ॥

ॐ अचिन्त्याय नमः ॥

ॐ अक्षीणगुणभासुराय नमः ॥

ॐ नक्षत्रगणसंचाराय नमः ॥

ॐ नयदाय नमः ॥ ६०

ॐ नीतिमार्गदाय नमः ॥

ॐ वर्षप्रदाय नमः ॥

ॐ हृषीकेशाय नमः ॥

ॐ क्लेशनाशकराय नमः ॥

ॐ कवये नमः ॥

ॐ चिन्तितार्थप्रदाय नमः ॥

ॐ शान्तमतये नमः ॥

ॐ चित्तसमाधिकृते नमः ॥

ॐ आधिव्याधिहराय नमः ॥

ॐ भूरिविक्रमाय नमः ॥ ७०

ॐ पुण्यदायकाय नमः ॥

ॐ पुराणपुरुषाय नमः ॥

ॐ पूज्याय नमः ॥

ॐ पुरुहूतादिसन्नुताय नमः ॥

ॐ अजेयाय नमः ॥

ॐ विजितारातये नमः ॥

ॐ विविधाभरणोज्ज्वलाय नमः ॥

ॐ कुन्दपुष्पप्रतीकाशाय नमः ॥

ॐ मन्दहासाय नमः ॥

ॐ महामतये नमः ॥ ८०

ॐ मुक्ताफलसमानाभाय नमः ॥

ॐ मुक्तिदाय नमः ॥

ॐ मुनिसन्नुताय नमः ॥

ॐ रत्नसिंहासनारूढाय नमः ॥

ॐ रथस्थाय नमः ॥

ॐ रजतप्रभाय नमः ॥

ॐ सूर्यप्राग्देशसंचाराय नमः ॥

ॐ सुरशत्रुसुहृदे नमः ॥

ॐ कवये नमः ॥

ॐ तुलावृषभराशीशाय नमः ॥ ९०

ॐ दुर्धराय नमः ॥

ॐ धर्मपालकाय नमः ॥

ॐ भाग्यदाय नमः ॥

ॐ भव्यचारित्राय नमः ॥

ॐ भवपाशविमोचकाय नमः ॥

ॐ गौडदेशेश्वराय नमः ॥

ॐ गोप्त्रे नमः ॥

ॐ गुणिने नमः ॥

ॐ गुणविभूषणाय नमः ॥

ॐ ज्येष्ठानक्षत्रसंभूताय नमः ॥ १००

ॐ ज्येष्ठाय नमः ॥

ॐ श्रेष्ठाय नमः ॥

ॐ शुचिस्मिताय नमः ॥

ॐ अपवर्गप्रदाय नमः ॥

ॐ अनन्ताय नमः ॥

ॐ सन्तानफलदायकाय नमः ॥

ॐ सर्वैश्वर्यप्रदाय नमः ॥

ॐ सर्वगीर्वाणगणसन्नुताय नमः ॥

॥ इति शुक्र अष्टोत्तरशतनामावलिः सम्पूर्णम् ॥